दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़कृष्णषष्ठी
आषाढः 22 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-254 | 1 | जुलाई 06, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 इण्डोनेशियादेशः गुरुदेव-रवीन्द्रनाथ-ठाकुरस्य ऐतिहासिकयात्रायाः

3 विदेशराज्यमन्त्री कीर्तिवर्धनसिंहः संयुक्तराष्ट्रसङ्घस्य एआई-प्रशासने (AI Governance) वैश्विकसंवादे भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति

4 उत्तराखण्डस्य मुख्यमन्त्री पुष्करसिंहधामी कैलाशमानसरोवरयात्रा-२०२६ इत्यस्य प्रथमदलं हरितपताकां प्रदर्श्य प्रस्थानम् अकारयत्

## छत्तीसगढस्य सुप्रसिद्धा पाण्डवनी-गायिका तीजनबाई दिवंगता

### राष्ट्रपतिः, उपराष्ट्रपतिः, प्रधानमन्त्री च तस्याः निधने गभीरं शोकं प्रकटितवन्तः



छत्तीसगढ़-राज्यस्य प्रख्याता पाण्डवानी-गायिका, 'पद्मविभूषण' पुरस्कारेण अलङ्कृता च डॉ. तीजन बाई इहलोकं परित्यज्य दिवङ्गता । सा दीर्घकालात् रुग्णा आसीत्। रायपुर-नगरस्य 'एम्स' चिकित्सालये तस्याः उपचारः प्रचलन् आसीत्। दुर्ग-जनपदस्य 'गनियारी' इत्यत्र तस्याः पेतृके ग्रामे पूर्ण-राज्य-सम्मानेन साकं तस्याः अन्त्येष्टि-संस्कारः विधास्यते। स्वकीयेन प्रखरेण स्वरेण, मञ्चस्य सम्मोहक उपस्थित्या, तथा च कथावाचनस्य अनन्य-शल्या डॉ. तीजन बाई पाण्डवानी-कलायन केवलं भारते अपि तु वश्विकपटले नूतनम् अभिज्ञानं प्रदत्तवती। मञ्चे महाभारतस्य कथाः जीवन्तं कर्तुं तस्याः असाधारण-क्षमतया सा भारतीय लोकसंस्कृतेः सर्वोत्कृष्टा, लब्धप्रतिष्ठा च साधिका सञ्जाता। भारतीय-लोककलायां तस्याः अप्रतिम अवदानस्य कृते सा 'पद्मश्री', 'पद्मभूषण' तथा च 'पद्मविभूषण' इत्यादिभिः देशस्य सर्वोच्च नागरिक-सम्मान विभूषिता आसीत्। राष्ट्रपतिः द्रौपदीमुर्मूः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन्, प्रधानमन्त्री नरेन्द्रमोदी च तस्याः दुःखद निधने गभीरं शोकं प्रकटितवन्तः ।

## संसदः 'प्रावृट्-सत्रम्' अस्य मासस्य विंशतिः दिनांकतः आरप्स्यते



संसदः 'प्रावृट्-सत्रम्' अस्य मासस्य विंशतिः दिनाङ्कतः आरप्स्यते, यत् च अगस्तमासस्य त्रयोदश दिनाङ्क यावत् प्रचलति। केन्द्रीय-संसदीयकार्यमन्त्री किरेन रिजिजू ज्ञापितवान् यत् राष्ट्रपतिः द्रौपदीमुर्मूः संसदः प्रावृट्-सत्रस्य आह्वानार्थं सर्वकारस्य प्रस्तावं सहर्ष स्वीकृतवती।

# भारत सर्वकारेण प्राकृतिक-वायोः आपूर्तौ आपत्कालिकाः प्रतिबन्धाः निरस्तीकृताः





प्रशासनेन द्रवीय-प्राकृतिक-वायोः आपूर्तिमालक्ष्य आपत्कालिकाः प्रतिबन्धाः निरस्ताः। अयं निर्णयः पश्चिम-एशियायां सङ्घर्षे युद्धविरामानन्तरं होर्मुज-जलडमरूमध्यमार्गेण प्राकृतिक-वायोः आपूर्तेः पुनः प्रारम्भे सति कृतः। पेट्रोलियम-प्राकृतिक-वात्येन्धन मन्त्रालयेन अधिसूचनायां उक्तं यत् 'षड्विंशत्यधिकद्विसहस्रतमवर्षस्य प्राकृतिक-वायु-आपूर्ति-नियमन आदेशः' इत्यस्मिन् संशोधनं कृतम्। अस्मिन् संशोधने तानि प्रमुखानि आपत्कालिकानि प्रावधानानि निरस्तानि सन्ति, येषां माध्यमेन प्रशासनं देशे उत्पादितस्य प्राकृतिकवायोः तथा आयातितस्य द्रवीय प्राकृतिकवायोः आवंटने प्राधान्यं दातुं अनुमतिः आसीत्। होर्मुज-जलडमरूमध्यात् द्रवीय प्राकृतिकवायोः आपूर्तौ व्यवधानस्य अनन्तरं, आवश्यकवस्तु-अधिनियमस्य अन्तर्गत अस्य वर्षस्य मार्च-मासे आपत्कालिकाः आदेशाः प्रवर्तिता आसीत्।

## केन्द्रीय-ग्रामीण-विकासमन्त्री शिवराजसिंहचौहानः विकसित भारत-रोजगार-आजीविका मिशन (ग्रामीण) अधिनियमस्य अन्तर्गतं राज्येभ्यः पञ्चविंशतिसहस्र-कोटि-रूप्यकाणां वित्तीयसहायतां प्रदत्तवान्



केन्द्रीय-ग्रामीणविकासमन्त्री शिवराजसिंहचौहानः जुलाई मासस्य प्रथमदिनाङ्कात् 'विकसित भारत रोजगार एवं आजीविका मिशन (ग्रामीण)' अर्थात् 'वीबी-जी-राम-जी' अधिनियमः सफलतया प्रभावशीलः अभवत् । मन्त्रिणा दृश्य-श्रव्य-माध्यमेन अस्य अभियानस्य-अन्तर्गतं राज्येभ्यः पंचविंशतिः सहस्रकोटि-रूप्यतोप्यधिकधनं च प्रदत्तम् । श्रीचौहानेन सर्वेषां राज्यानां केन्द्रशासितप्रदेशानां च ग्रामीणविकासमन्त्रिभिः साकं 'वीबी-जी राम-जी' अधिनियमस्य क्रियान्वयनस्य प्रगतेः समीक्षा अपि कृता। तेन प्रोक्तं यत् विमुक्तायाः प्रथमांश-धनराशेः मुख्यमुद्देश्यं राज्यानां पार्श्वे पर्याप्तनिधेः सुनिश्चयनम् अस्ति, येन श्रमिकाणां वृत्तिः पञ्चदशदिनानाम् अआभ्यन्तरे एव प्रदातुं शक्येत् ।

## केन्द्रसर्वकारेण मेटा-संस्थाय इंस्टाग्राम-मञ्चात् बाल-शोषणसम्बद्ध-विज्ञापनानां निष्कासनस्य आदेशः प्रदत्तः; सह सप्तदिनेषु स्पष्टीकरणं प्रस्तोतुं निर्देशाः अपि प्रदत्ताः





इन्स्टाग्राम इति सामाजिक-संवाद-मञ्चे सशुल्केषु विज्ञापनेषु प्रचलतः बाल-यौन शोषण-सामग्र्याः गम्भीरं वृत्तान्तं मत्वा भारतसर्वकारेण मेटा इत्यस्याः संस्थायाः कृते एका तीक्ष्णा, दृढा च सूचना प्रसारिता। आधिकारिक स्रोतोभिः ज्ञापितं यत् सर्वकारेण इन्स्टाग्राम-प्रशासनं तादृशां सर्वेषाम् अपमानास्पद-सामग्रीणां विज्ञापनप्रसारणं प्रवेश-सुविधिं च सद्यः प्रतिरोद्धुं समादिष्टम्। केन्द्रीय-इलेक्ट्रॉनिक्स एवं सूचना प्रौद्योगिकी-मन्त्रालयेन अस्य विषयस्य गम्भीरतां वीक्ष्य मेटा-संस्थायाः सप्तदिनानां अभ्यन्तरे विस्तृत स्पष्टीकरणं याचितम्। सर्वकारः सम्प्रति अस्यापि पुनरीक्षणं करोति यत् अयं मञ्चः भारतस्य 'मध्यस्थ-सुरक्षा-मार्गदर्शिकानां' निष्ठापूर्वकं पालनं करोति न वा। उल्लेखनीयं वर्तते यत् भारते डिजिटल-नियमस्य अन्तर्गत आपत्तिजनक-सामग्र्याः, बाल-यौन-शोषण-सामग्र्याः वितरणं, प्रसारणं च कश्चन् दण्डनीय अपराधो वर्तते।

## सुभाषितम्

**सुहृदां हितकामानां**
**यः शृणोति न भाषितम्।**
**विपत्संनिहिता तस्य**
**स नरः शत्रुनन्दनः॥**
**(हितोपदेश, मित्रलाभ- ७४)**

अर्थात्- जो मनुष्य अपने हितकारी मित्रों का वचन नहीं सुनता है उसके पास ही विपत्ति है और वह अपने शत्रुओं को प्रसन्न करने वाला है।

दैनिकम् ई-संस्कृतवार्तापत्रम्
हिमसंस्कृतवार्ताः
हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता
१०० ₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263

सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्रकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

कार्यालयः
हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवाहरसङ्केतः-१७७१११
सङ्केता- प्रबन्धनिदेशिका- शिवानी शर्मा हिमसंस्कृतम्

## भारतीय-ऋतु-विज्ञान-विभागः

भारतीय-ऋतु-विज्ञान-विभागेन गुजरात, कच्छ, कोङ्कण, गोवा, मध्य महाराष्ट्र, ओड़िशा चेत्येतेषु राज्येषु अतिवृष्टेः रक्त-वर्षीया संचेतना प्रसारिता। विभागेन विज्ञापितं यत् आगामिषु चतुर्षु दिवसेषु मध्यभागे उत्तर-अरब सागरस्य कतिपयेषु भागेषु, गुजरात-प्रान्ते, तथा च हरियाणा, पंजाब, राजस्थानप्रान्तानां शिष्टेषु क्षेत्रेषु च प्रावृट् स्थितिः सर्वथा अनुकूला वर्तते। ऋतु-विज्ञान-विभागेन छत्तीसगढ़, मध्यप्रदेश, राजस्थान, कर्नाटक, उत्तराखण्ड चेत्येतेषु राज्येषु अतिवृष्टेः पूर्वानुमानं कृतम्। अनेन साकमेव, आगामिषु द्वित्रेषु दिनेषु दिल्ली, उत्तरप्रदेश, पंजाब तथा च चण्डीगढ़क्षेत्रेषु विकीर्ण-रूपेण वृष्टेः सम्भावना प्रकटिता।

# किम् इदं संजातम्?: इच्छन् अपि विद्यालयभवनस्य उद्घाटनं कर्तुं न शक्नोत् शिक्षामन्त्री! किम् प्रियंका-महोदयायाः हस्तैः एव च्छेत्स्यति सूत्रम् ?



**हिमसंस्कृतवार्ताः — शिमला।** हिमाचलप्रदेशस्य द्रङ्ग-विधानसभाक्षेत्रस्य राजकीय-वरिष्ठ-माध्यमिक-पाठशाला-देवरी इत्यस्याः नवनिर्मितस्य विद्यालयभवनस्य रविवासरे प्रस्तावितम् उद्घाटनम् अन्तिमे समये स्थगितं जातम्। शिक्षामन्त्री रोहितठाकुरः पूर्णेन प्रशासनिक-गणेन जनप्रतिनिधिभिः च साकं कार्यक्रमस्थलं प्राप्तवान्, परन्तु सर्वासु सज्जतासु सत्यास्वपि नूतनभवनस्य उद्घाटनं भवितुं नाशक्नोत्। अनेन घटनाक्रमेण स्थानीयग्रामीणेषु महान् रोषः दृष्टः।

### उद्घाटनार्थं स्थापिता प्रस्तर-पट्टिका (शिलालेखः) अपि दूरीकृता

कार्यक्रमे पूर्वमन्त्री वरिष्ठकाङ्ग्रेसनेता ठाकुरकौलसिंहः अपि उपस्थितः आसीत्। शिक्षामन्त्रिणः आगमनात् पूर्वं यावत् वरिष्ठमाध्यमिकपाठशालायाः नूतनभवनस्य उद्घाटनपट्टिका स्थापिता आसीत्, परन्तु किञ्चित्कालानन्तरं सा दूरीकृता। यदा शिक्षामन्त्री कार्यक्रमस्थलं प्राप्तवान् तदा तत्र केवलं प्राथमिकपाठशालाभवनस्य पट्टिका एव दृश्यते स्म। एतस्मात् परं मन्त्रिणा पूजा-अर्चना कृता, यथा एव सः जनसभां सम्बोधयितुं मञ्चं प्राप्तवान्, पृष्ठतः द्वितीया पट्टिका अपि दूरीकृता। अन्ततः न तु प्राथमिकपाठशालायाः नूतनभवनस्य उद्घाटनम् अभवत्, न च वरिष्ठमाध्यमिकपाठशालायाः भवनस्य।

### भीषणविपत्तेः परं निर्मितम् आसीत् विद्यालयभवनम्

उल्लेखनीयं वर्तते यत् देवरी-क्षेत्रस्य एतत् नूतनं विद्यालयभवनं वर्ष २०२३ तमवर्षस्य भीषणविपदः (आपदा के बाद) परं निर्मितम् अस्ति। तस्मिन् काले प्रचण्डवृष्ट्या पुरातनं भवनं क्षतिग्रस्तं संजातम् आसीत्। विपदः परं प्रियंकागान्धी देवरीं प्राप्ता आसीत्, तया च प्रभावितान् जनान् मिलित्वा विद्यालयभवनस्य शीघ्रनिर्माणस्य विश्वासः प्रदत्तः आसीत्। प्रायः ४.७० कोटिरूप्यकाणां (4.70 करोड़) व्ययेन सज्जं जातम् एतत् भवनं गतेभ्यः कतिपयमासेभ्यः उद्घाटनस्य प्रतीक्षां करोति।

### पूर्वम् अपि द्विवारं स्थगितम् उद्घाटनम्

इतः पूर्वम् अपि द्विवारं प्रियंकागान्ध्याः प्रस्तावितकार्यक्रमानुसारम् अस्य भवनस्य उद्घाटनं निश्चितं कृतम् आसीत्, परन्तु विभिन्नेभ्यः कारणेभ्यः द्वौ अपि कार्यक्रमौ निरस्तौ अभवताम्। अधुना शिक्षामन्त्रिणः कार्यक्रमे अपि उद्घाटनं न संजातं, येन कारणेन क्षेत्रे चर्चानां क्रमः तीव्रः जातः। ग्रामीणानां कथनमस्ति यत् एवम् प्रतीयते यत् सर्वकारः अस्य भवनस्य उद्घाटनं प्रियंकागान्ध्याः हस्तैः एव कारयितुम् इच्छति।

### स्थानीयजनेषु निराशा

उद्घाटनस्य स्थगनत्वात् स्थानीयजनेषु— 'चुड़ा मनी, राजेन्द्र, हीरा लाल:' इत्येतेषु निराशा असन्तोषश्च स्पष्टं दृश्यते स्म। ग्रामीणानां प्रतिपादनमस्ति यत् भवनं पूर्णरूपेण सज्जं वर्तते, छात्र-छात्राणां हिताय च एतत् शीघ्रतिशीघ्रं जनतायै समर्पितं करणीयम्। तेषाम् उक्तिरस्ति यत् वारं-वारम् उद्घाटनस्थगनेन जनानां भावनाः आहत्यन्ते।

### मन्त्रिणः वक्तव्यम्

अस्मिन् सम्पूर्णे प्रकरणे शिक्षामन्त्रिणा रोहितठाकुरेण कथितं यत् विद्यालयभवनं सद्यः एव जनतायै समर्पितं विधास्यते। तेन ज्ञापितं यत् तेन स्वविभागात् अस्मिन् सन्दर्भे प्रतिवेदनं (रिपोर्ट) याचितम् अस्ति, आवश्यकीषु औपचारिकतासु पूर्णासु सत्येव भवनस्य उद्घाटनं विधास्यते।

# अद्यारभ्य अष्टं दिनांकं यावत् प्रधानमन्त्री नरेन्द्रमोदी इण्डोनेशियायाः यात्रायां स्थास्यति



प्रधानमन्त्रिणः नरेन्द्रमोदिनः इण्डोनेशिया-देशस्य आधिकारिकी यात्रा उभयोः देशयोः पारस्परिक सम्बन्धाय नूतन-उत्साहं प्रदास्यति, सह सहयोगस्य नवीन क्षेत्राणि अपि उद्घाटयिष्यति। इण्डोनेशिया-देशे नियुक्तः भारतीय राजदूतः सन्दीप चक्रवर्ती प्रावोचत् यत् जुलाई मासस्य षट् दिनाङ्कतः जुलाई मासस्य अष्ट दिनाङ्क यावत् प्रचलन्त्यां प्रधानमन्त्रिणः अस्यां यात्रायां भारत-इण्डोनेशियादेशयोः मध्ये सहयोगस्य अनेकानि नूतनानि द्वाराणि उद्घाटितानि भविष्यन्ति, तथा च एतयोः द्वयोः विशाल राष्ट्रयोः मध्ये प्रगाढ सम्बन्धाः आर्थिक-सहभागिता च स्पष्टरूपेण द्रक्ष्यन्ते। तेन अग्रे प्रतिपादितं यत् भारत-इण्डोनेशियादेशयोः मध्ये किमपि वसत्यं अथवा विचार-भिन्नता नास्ति; अतः सम्प्रति उभे अपि राष्ट्रे 'विकसित भारत' तथा च 'स्वर्ण इण्डोनेशिया' इत्येतयोः दूरगामी-लक्ष्याणां प्राप्तये सुदृढं रणनीतिक-सहयोगं कर्तुं तत्परे वर्तेते।

# विकसितभारतस्य सङ्कल्पं साकारं विधातुं कार्यकर्तारः सक्रियां भूमिकां निर्वहन्तु - अनुरागठाकुरः






**हिमसंस्कृतवार्ताः — मण्डी।** 'पण्डितदीनदयाल-उपाध्याय-प्रशिक्षणमहाअभियान-२०२६' इत्यस्य अन्तर्गतं सङ्गठनात्मक-मण्डलेन सुन्दरनगरेण नाचन-विधानसभाक्षेत्रस्य 'गोहर' स्थिते 'म्याह माता' मन्दिरभवने आयोजितस्य द्विदिवसीय-प्रशिक्षणवर्गस्य रविवासरे सफलं समापनम् अभवत्। समापनसत्रे पूर्वकेन्द्रीयमन्त्री हमीरपुर-संसदीयक्षेत्रस्य सांसदश्च (सांसद) मुख्यवक्तृरूपेण कार्यकर्तॄन् पदाधिकारिणश्च सम्बोधितवान्।

अनुरागठाकुरेण राज्यसर्वकारस्य जनविरोधिनीनां नीतीनां, विकासकार्येषु मन्दतायाः, प्रतिश्रुतिभङ्गस्य (वायदाखिलाफी), प्रशासनिकविफलतानां च उल्लेखं कुर्वता कथितं यत् भाजपा-कार्यकर्तारः तथ्यानाम् आधारेण सर्वकारस्य विफलताः जनतायाः मध्ये उपस्थापयेयुः तथा च पूर्वतन-भाजपासर्वकारस्य केन्द्रसर्वकारस्य च विकासकार्याणां जनहितकारिणीनां योजनानां च सूचनाम् अपि सामान्यजनेभ्यः प्रापयेयुः।

अनुरागठाकुरः अवदत् यत् भारतीयजनतापक्षस्य महती शक्तिः तस्य समर्पितः, अनुशासितः, राष्ट्रहिताय च तत्परः कार्यकर्त्ता एव अस्ति। कोटिशः कार्यकर्तॄणां निरन्तरपरिश्रमेण सङ्गटनं प्रति निष्ठया च भाजपा अद्य विश्वस्य बृहत्तमं राजनैतिकदलं संजातम्। तेन प्रतिपादितं यत् भाजपायाः कार्यकर्त्ता राष्ट्रं सर्वोपरि, दलं द्वितीयस्थाने, स्वयं च तृतीयस्थाने निधाय कार्यं करोति, एषा एव भाजपादलस्य महान् परिचयः अस्ति।

तेन प्रोक्तं यत् प्रधानमन्त्रिणः नेतृत्वे भारतं विकासस्य नूतनान् आयामान् स्थापयति। वर्ष २०४७ पर्यन्तं 'विकसितभारतं' तथा 'विश्वगुरुभारतं' इत्यस्य सङ्कल्पं साकारं विधातुं प्रत्येकस्य कार्यकर्तुः महती भूमिका वर्तते। तेन कार्यकर्तारः प्रार्थिताः यत् ते केन्द्रसर्वकारस्य जनकल्याणकारिणीः योजनाः उपलब्धीश्च गृहं-गृहं प्रापयन्तः राष्ट्रनिर्माणे सक्रियं योगदानं दद्युः। अस्मिन् अवसरे प्रदेशोपाध्यक्षः नाचन-क्षेत्रस्य विधायकः विनोदकुमारः, भाजपाप्रदेशमुख्यप्रवक्ता सुन्दरनगरस्य विधायकः राकेशजम्वालः, सरकाघाटस्य विधायकः दलीपठाकुरः, भाजपाप्रदेशप्रवक्ता अजयराणा, प्रदेशसचिवः तिलकराजशर्मा, रजत-ठाकुरः, भाजपाजिलाध्यक्षः हीरालालः च समेताः मण्डलपदाधिकारिणः, विभिन्नानां मोर्चानां प्रतिनिधयः भूरिसङ्ख्यायां भाजपाकार्यकर्ताराश्च उपस्थिताः आसन्।

# इण्डोनेशियादेशः गुरुदेव-रवीन्द्रनाथ-ठाकुरस्य ऐतिहासिकयात्रायाः शताब्दीमहोत्सवं मानयिष्यति



इण्डोनेशियादेशः गुरुदेव-रवीन्द्रनाथ-ठाकुरस्य तत्रत्य-ऐतिहासिकयात्रायाः शताब्दी-महोत्सवं मानयिष्यति। एतदर्थं वर्षं २०२६ तः २०२७ पर्यन्तं १५ मासानां कार्यक्रमः आयोजितः भविष्यति। इण्डोनेशियादेशे भारतस्य राजदूतः सन्दीपचक्रवर्ती सम्भाषणे अवदत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः श्वः आरभ्यमाणायाः इण्डोनेशिया-यात्रायाः अवसरे एतेषाम् कार्यक्रमाणां शुभारम्भः करिष्यति। शताब्दीसमारोहेषु प्रदर्शिनीनां, वर्षपर्यन्तं चलितॄणां सांस्कृतिककार्यक्रमाणां च आयोजनं भविष्यति।

# Kangra News - धर्मशालायाः डॉ. अभिनवेन चित्रीकृताः ६०० (षट्शतं) दुर्लभाः पक्षिप्रजातयः



**हिमसंस्कृतवार्ताः — धर्मशाला।** धर्मशाला-क्षेत्री-चिकित्सालये नियुक्तः त्वचा-रोग-विशेषज्ञः डॉ. अभिनवचौधरी २५ वर्षाणां निरन्तरपरिश्रमेण प्रकृतिं प्रति समर्पणेन च हिमाचलप्रदेशे पक्षिणां ६०० प्रजातयः २५ उपप्रजातयश्च स्वकीये चित्राङ्कनयन्त्रे बद्ध्वा एकां विलक्षणां सिद्धिं प्राप्तवान्। वर्षे २०१७ मध्ये वनविभागेन प्रदेशे ६७२ पक्षिप्रजातयः पञ्जीकृताः आसन्, एतादृशीं स्थितिं प्रति डॉ. चौधरी महोदयस्य अयं सङ्ग्रहः हिमाचलस्य जैवविविधतायाः एकः महत्त्वपूर्णः प्रलेखः (दस्तावेज) मन्यते। तेन कस्यापि आधुनिक-चलभाष-अनुप्रयोगस्य (मोबाइल ऐप) सामाजिक-माध्यमस्य (सोशल मीडिया) वा साहाय्यं विना केवलं दूरवीक्षणयन्त्रेण (दूरबीन) कॅमरा-यन्त्रेण च साकम् एतत् स्थानं सम्प्राप्तम्। अनेन सहैव तेन पक्षिणाम् उपरि ६० तः अधिकाः वैज्ञानिकानि शोधपत्राणि प्रकाशितानि प्रदेशे च प्रायः ३० नूतनाः पक्षिसङ्केताः (रिकॉर्ड) अपि पञ्जीकृताः।

### हिमशिखरेभ्यः आरभ्य वनान्तान् यावत् कृतं भ्रमणम्

दुर्लभानां पक्षिणाम् अन्वेषणाय डॉ. चौधरी महोदयेन लाहौल-स्पीतिः, पाङ्गी, 'ग्रेट हिमालयन नैशनल पार्क', सिरमौरस्य वनानि, पौङ्ग-बाँध-क्षेत्रं समेताः प्रदेशस्य प्रायः प्रत्येकस्मिन् भागे भ्रमणं विहितम्। अस्मिन् अन्तराले तेन 'रैड क्रॉसबिल', 'तिब्बती सैंडग्राउज', 'हुडेड पिट्टा' तथा च 'पाइड थ्रश' सदृशानां दुर्लभानां पक्षिणां चित्राणि स्वकीये कॅमरा-यन्त्रे सङ्गृहीतानि।

### एकस्य पक्षिणः कृते एकस्मिन् एव दिने ५०० किलोमीटर परिमितः प्रवासः कृतः

डा. अभिनवेन ज्ञापितं यत् बहुवारं कस्यचित् दुर्लभपक्षिणः दर्शनमात्रं प्राप्तुं तेन कठिनावस्थानां सम्मुखीकरणं कृतम्। 'यलो-ब्रेस्टेड बंटिंग' इति पक्षिणः चित्रं ग्रहीतुं तेन एकस्मिन् एव दिने ५०० किलोमीटरतः अधिकः प्रवासः कृतः, यत्रैव राज्यपक्षिणः 'वेस्टर्न ट्रैगोपन' (जुजुआना) इत्यस्य चित्राय बहुदिनानि यावत् दुर्गमेषु पर्वतेषु पदयात्रा (ट्रैकिंग) करणीया अभवत्। तस्य सूच्यां सम्मिलितासु अन्तिमासु १५ प्रजातिषु तिस्रः प्रजातयः हिमाचले प्रथमवारं पञ्जीकृताः सन्ति।

### प्रकृतिसंरक्षणस्य अपि दत्तः सङ्देशः

डॉ. अभिनवचौधरी महोदयेन स्वकीयायाः सफलतायाः श्रेयः परिवाराय चिकित्सालयप्रशासनाय च प्रदत्तः। तेन कथितं यत् विकासकार्यैः, वनानां च्छेदनेन, अवैधमृगयया च पक्षिणां प्राकृतिकाः आवासाः तीव्रगत्या नष्टाः भवन्ति। तेन जैवविविधतायाः वन्यजीवसंरक्षणस्य च कृते सामूहिकप्रयासानाम् आवश्यकतायाम् बलं दत्त्वा जनेभ्यः पर्यावरणसंरक्षणे सक्रियायै सहभागितायै प्रार्थना कृता।

# विदेशराज्यमन्त्री कीर्तिवर्धनसिंहः संयुक्तराष्ट्रसङ्घस्य एआई-प्रशासने (AI Governance) वैश्विकसंवादे भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति






विदेशराज्यमन्त्री कीर्तिवर्धनसिंहः जिनेवा-नगरे एआई-प्रशासने संयुक्तराष्ट्रसङ्घस्य वैश्विकसंवादे भारतीयप्रतिनिधिमण्डलस्य नेतृत्वं करिष्यति। विदेशमन्त्रालयेन उक्तं यत् एआई-प्रशासने वैश्विकसंवादः एकः सार्वभौमिकः, बहु-हितधारकः संयुक्तराष्ट्रस्य मञ्चः अस्ति, यस्य स्थापना महासभायाः एकस्य सङ्कल्पस्य अन्दर्गते कृता अस्ति। एषः मञ्चः भविष्यस्य सन्धेः (Pact for the Future) अन्तर्गतं सितम्बर २०२४ मध्ये स्वीकृतस्य वैश्विक-डिजिटल-सन्धेः (Global Digital Compact) अनन्तरं स्थापितः अस्ति।मन्त्रालयेन प्रतिपादितं यत् एषः वैश्विकसंवादः एआई-प्रौद्योगिक्याः अन्तर्राष्ट्रिय-सञ्चालनं अग्रे नेतुं एकः अद्वितीयः अवसरः अस्ति, यः अन्तर्राष्ट्रिय-क्षेत्रीय-राष्ट्रीय-बहुहितधारकप्रयासाणां पूरकः अस्ति। वैज्ञानिकबोधं, पारदर्शितां, उत्तरदायित्वं, सुदृढ मानवीयपर्यवेक्षणं च प्रवर्धयता स्वतन्त्र-अन्तर्राष्ट्रिय-वैज्ञानिक-पटलेन (Independent International Scientific Panel) सह मिलित्वा, एषः संवादः विशेषरूपेण विकासशीलदेशेषु क्षमतानिर्माणे साहाय्यं करिष्यति, येन एआई-प्रणाल्यः सततविकासस्य दिशि निर्दिष्टाः भवेयुः। विगते वर्षे आगस्तमासे स्वीकृतानां कार्यशर्तानां पद्धतीनां च अनुरूपं, सह-अध्यक्षैः बहवः हितधारक-परामर्शाः अपि आयोजिताः आसन्, येषु अस्मिन् वर्षे फरवरीमासे नवदेहल्यां आयोजितस्य 'एआई प्रभाव सम्मेलनस्य' अवसरे व्यक्तिगतपरामर्शः अपि सम्मिलितः आसीत्।जिनेवा-नगरे आयोज्यमाने अस्मिन् द्विदिवसीये वैश्विक-एआई-संवादे एआई-विषये स्वतन्त्र-अन्तर्राष्ट्रिय-वैज्ञानिक-पटलस्य वार्षिकः प्रतिवेदनः (Annual Report) प्रस्तुतः भविष्यति, यः एआई-प्रौद्योगिक्याः क्षमतानां, उद्भवतां अवसराणां, जोखिमानां च प्रथमं स्वतन्त्रं वैज्ञानिकं मूल्याङ्कनं प्रदास्यति।

# तकनीकीसंस्थानेभ्यः नूतना नवाचारनीतिः, २ कोटिरूप्यकाणां कोषः स्वीकृतः



**हिमसंस्कृतवार्ताः- शिमला।** प्रदेशे नवाचारम्, उद्यमितां, स्टार्ट-अप-संस्कृतिं च वर्धयितुं उद्देश्यात् राज्यसर्वकारेण तकनीकी- शैक्षणिकसंस्थानेभ्यः 'राज्यनवाचारनीतिः' तथा च 'राज्यनवाचारकोष- कार्यान्वयन- दिशानिर्देशाः (२०२६-२०२८)' इत्यस्यै स्वीकृतिः दत्ता। अस्याः नीतेः उद्देश्यं नवाचारान् व्यवहारयोग्यासु, प्रौद्योगिक्याः, विपणस्य (मार्केट) च अनुकूलानां समस्यानां समाधानेषु परिवर्तयितुं वर्तते, येन विद्यार्थिनः, शिक्षकाः, स्टार्टअप्स-संस्थाश्च शक्ताः भविष्यन्ति। अनेन राज्ये नवाचाराधारितं पारिस्थितिकीतन्त्रं (ईको-सिस्टम) सज्जं भविष्यति, हिमाचलप्रदेशः देशस्य नवाचारकेन्द्ररूपेण प्रस्थापितः भविष्यति। एषा नीतिः आदिरूपविकासं (प्रोटोटाइप डेवलपमेंट), स्टार्टअप-उन्मेषणं (इनक्यूबेशन), बीजवित्तीयनम् (सीड फंडिंग), बौद्धिकसम्पदाप्रबन्धनं, क्षमतानिर्माणं, उद्योगैः साकं सहयोगं च प्रति एकां व्यापकां रूपरेखाम् उत्पादयति। अस्मिन् पारदर्शितां, उत्तरदायित्वं, परिणामानां सुनिश्चितीकरणं च प्रति विशेषं बलं दत्तम्। नीतेः प्रभावीक्रियान्वयनाय राज्यसर्वकारेण २०२६-२०२८तमवर्षस्य अवधये द्विकोटिरूप्यकाणां प्रावधानेन साकं 'राज्यनवाचारकोषः' स्थापितः। अस्य कोषस्य माध्यमेन नवाचारान् आकारं प्रदातुं 'माइक्रो ग्रांट' (लघु-अनुदानं), स्टार्टअप्स-कृते बीज-वित्तीयनम् (सीड फंडिंग), उन्मेषणकेन्द्राणां (इनक्यूबेशन सेंटर्स) सुदृढीकरणाय वित्तीयसहायता, नवाचारप्रतियोगिताः, बूट-कैंप (शिविराणि), शिक्षकाणां विद्यार्थिनां च प्रशिक्षणकार्यक्रमाः, उद्योगानां 'कॉर्पोरेट सामाजिक- उत्तरदायित्व' इत्यस्य सहयोगेन सह- वित्तीयन-सदृशीभ्यः प्रचेष्टाभ्यः सहयोगः प्रदास्यते। नीतेः माध्यमेन समावेशी-नवाचारे विशेषं बलं दत्त्वा महिलानाम्, अनुसूचितजातीनां, अनुसूचितजनजातीनां, ग्रामीणयुवानामपि तकनीकीशिक्षायां स्टार्टअप-पारिस्थितिकी-तन्त्रे च अधिकां सहभागितां प्रोत्साहितं करिष्यते।तकनीकीशिक्षा-व्यावसायिक-औद्योगिकप्रशिक्षणविभागस्य निदेशकः अस्या नीतेः क्रियान्वयनाय नोडल-अधिकारी (प्रधान-अधिकारी) भविष्यति। संस्थागतस्तरे 'क्लस्टर इनोवेशन समितयः' तथा च राज्यस्तरे 'राज्यनवाचार सलाहकार समूहः' परियोजनानां चयने, कोषस्य उपयोगे, नीतेः समग्रकार्यान्वयनस्य च निरीक्षणं विधास्यन्ति, येन अस्य प्रभावी समयबद्धश्च क्रियान्वयनः सुनिश्चितः कर्तुं शक्येत। बौद्धिकसम्पदायाः स्वामित्वं नवाचारकर्तणाम् एव भविष्यतिः मुख्यमन्त्री मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुमहोदयेन कथितं यत् एषा नीतिः बौद्धिकसम्पदास्वामित्वाय राजस्वसाझेदार्यै (राजस्वविभाजनाय) च एकं समानं स्पष्टं च प्रारूपं स्थापयिष्यति। तेन प्रोक्तं यत् अस्य कार्यक्रमस्य अन्तर्गतं विकसितानां नवाचाराणां स्वामित्वं नवाचारकर्तणाम् (इन्नोवेटर्स) पार्श्वे एव स्थास्यति, यत्रैव शैक्षणिकसंस्थानेभ्यः केवलं शैक्षणिक-उपयोगाय 'नॉन-एक्सक्लूसिव' (अविशेष) अधिकाराः प्राप्स्यन्ते। तेन प्रतिपादितं यत् एषा पहलः नवाचाराधारित-आर्थिकविकासस्य गत्यै, रोजगारस्य नूतनावसराणां सृजनाय, स्टार्टअप- पारिस्थितिकी-तन्त्रस्य दृढीकरणाय, प्रदेशस्य विकासे समाजस्य सर्वेषां वर्गाणां यूनां सहभागितां च वर्धयितुं महत्त्वपूर्णं भूमिकां निर्वक्ष्यति। मुख्यमन्त्रिणा प्रख्यापितं यत् सर्वकारः द्वयोः वर्षयोः परम् अस्या नीतेः व्यापकं पुनरीक्षणं (समीक्षां) विधास्यति, नीतेः अन्तर्गतं विकसितानां प्रोटोटाइपयन्त्राणां, स्थापित-स्टार्टअप्स- संस्थानां, बौद्धिकसम्पदापञ्जीकरणानां, सृजितरोजगाराणां निवेशानां च सदृशानां प्रमुखाणां परिणामानां मूल्याङ्कनं करिष्यते।

# उत्तराखण्डस्य मुख्यमन्त्री पुष्करसिंहधामी कैलाशमानसरोवरयात्रा-२०२६ इत्यस्य प्रथमदलं हरितपताकां प्रदर्श्य प्रस्थानम् अकारयत्




हिमसंस्कृतवार्ता। उत्तराखण्डस्य मुख्यमन्त्री पुष्करसिंहधामी अद्य कैलाशमानसरोवरयात्रा-२०२६ इत्यस्य प्रथमदलं चम्पावतजनपदस्य टनकपुरतः हरितपताकां प्रदर्श्य प्रस्थानम् अकारयत् । अस्मिन् दले एकेन चिकित्सकेन सह ४९ तीर्थयात्रिणः सन्ति, येषु ३४ पुरुषाः १५ महिलाः च सन्ति।अस्मिन् अवसरे मुख्यमन्त्री अवदत् यत् कैलाशमानसरोवरयात्रा केवलं एका धार्मिकयात्रा नास्ति, अपितु आध्यात्मिकजागरूकतायाः, सांस्कृतिकएकतायाः, राष्ट्रियसद्भावस्य च प्रतीकः अस्ति। सः अवदत् यत् एषा तीर्थयात्रा सीमान्तक्षेत्राणां विकासं, पर्यटनं, स्थानीय अर्थव्यवस्थां च प्रोत्साहयति। श्रीधामी तीर्थयात्रिभ्यः स्थानीयहस्तशिल्पानां उत्पादानां च क्रयणं कृत्वा स्थानीयजनान् प्रोत्साहितुं प्रार्थनां कृतवान्।सः अकथयत् यत् प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे देशे सनातनसंस्कृतेः संरक्षणाय संवर्धनाय च बहवः ऐतिहासिकाः चरणाः (उपायाः) स्वीक्रियन्ते, प्राचीनमन्दिराणां जीर्णोद्धारः सौन्दर्यीकरणं च क्रियते। सः सर्वेभ्यः तीर्थयात्रिभ्यः सुरक्षित-सफलयात्रायाः शुभाशंसाः दत्तवान्।तीर्थयात्रिभिः राज्यसर्वकारेण कृतानां व्यवस्थानां भूरि प्रशंसा कृता। अनिलकुमारजैनप्रभृतयः बहवः तीर्थयात्रिणः, ये सप्तमवारं कैलाशमानसरोवरयात्रां कुर्वन्तः सन्ति, यात्रायाः कृते उत्तमसुरक्षायाः सुविधानां च व्यवस्थां कर्तुं राज्यसर्वकारं प्रति कृतज्ञतां ज्ञापितवन्तः।

अस्मिन् प्रथमे दले आन्ध्रप्रदेश-दिल्ली-गुजरात-हरियाणा-झारखण्ड-कर्नाटक-मध्यप्रदेश-महाराष्ट्र-राजस्थान-तमिलनाडु- तेलङ्गाना-उत्तरप्रदेश-उत्तराखण्डराज्येभ्यः तीर्थयात्रिणः सम्मिलिताः सन्ति। तमिलनाडुराज्यस्य डॉ. अरुणकुमारः चिकित्सकत्वेन दलेन सह अस्ति। राजस्थानस्य ६८ वर्षीयः पुरुषोत्तमखण्डेलवालः समूहस्य ज्येष्ठतमः तीर्थयात्री अस्ति, यदा तु गुजरातस्य २१ वर्षीयः हरिकृष्णः कनिष्ठतमः (युवा) अस्ति।

विशेषम्: उल्लेखनीयं वर्तते यत् मुख्यमन्त्रिणः पुष्करसिंहधामिनः प्रयासैः कैलाशमानसरोवरयात्रा निरन्तरं द्वितीये वर्षे अपि टनकपुरमार्गेण सञ्चालिता भवति। अनेन चम्पावतस्य सीमान्तजनपदे धार्मिकपर्यटनं, व्यापारः, परिवहनं, होटल्-व्यवसायः, रोजगारस्य अवसराः च वर्धिष्यन्ते इति आशा अस्ति।

# कार्मिक-लोकशिकायत-पेन्शन-राज्यमन्त्री डॉ. जितेन्द्रसिंहः भारतीयमजदूरसङ्घस्य प्रतिनिधिमण्डलेन सह अमिलत्



हिमसंस्कृतवार्ताः, नवदेहली। कार्मिक, लोकशिकायत एवं पेन्शन राज्यमन्त्री डॉ. जितेन्द्रसिंहः भारतीयमजदूरसङ्घस्य तथा सम्बद्धकर्मचारिसङ्गठनानां प्रतिनिधिमण्डलेन सह मेलनं कृतवान्। डॉ. जितेन्द्रसिंहः प्रतिनिधिमण्डलेन सह सरकारीकर्मचारिणां, पेन्शनधारकाणां च प्रशासनिकसुधारैः सम्बद्धानां अनेकेषां विषयाणां उपरि चर्चां कृतवान्। सः शासकीयसेवायाः सम्बद्धान् विषयान् सर्वकारस्य समक्षं उपस्थापयितुं रचनात्मकभूमिकां निर्वोढुं कर्मचारिसङ्गठनानां भूरि प्रशंसां कृतवान्।केन्द्रीयमन्त्री अवदत् यत् हितधारकैः (Stakeholders) सह नियमितेन संवादेन प्रशासनं सुदृढं भवति, कर्मचारिभिः पेन्शनधारकैः च सम्बद्धानां समस्यानां समये समाधाने च सौकर्यं भवति।प्रतिनिधिमण्डलेन कर्मचारी-केन्द्रित-प्रयासानां, विशेषतः आयुधनिर्माणीनां (Ordnance Factories) प्रायः ६५ सहस्र (६५,०००) भूतपूर्वकर्मचारिणां पुनः नियोजनाय (पुनः तैनाती) कृतस्य निर्णयस्य कृते श्रीजितेन्द्रसिंहस्य श्लाघा कृता।

# “जीवनपाठः”

## “महाभारते दर्शनप्रकाराः”

महाभारते षड् दृष्ट्या प्रकाराः वर्णिताः। धृतराष्ट्रः, गान्धारी, दुर्योधनः, अर्जुनः, कृष्णः, सञ्जयः च। धृतराष्ट्रः जन्मान्धः। किन्तु तस्य समीपे अन्तस्थः दृष्टि अपि नास्ति। संसारे यदा-यदा पश्चातापस्य समय आगच्छति तदा वयम् अपि धृतराष्ट्रः अभवन्। तत् अस्मरन्। यत्र-यत्र प्रत्युत्क्रमेण स्वमतः स्थापनस्य आवश्यकता अस्ति तदा वयं अनवधानमं कृतम्। तदा वयं गान्धारी अभवन्। निर्णयं कर्तुं न शक्नुवन् अर्जुनस्य स्थितिः इव भवति। अन्येषाम् जनानां दुःखं यदा वयं तटस्थेन पश्यामः तदा श्रीकृष्णस्य साक्षीभावः समीपस्थः। यदि श्रीकृष्णस्य तत्वानि अनुमन्यते तर्हि का कथा? अन्येषाम् दुःखस्य यदा-कदा जनाः उपहास कुर्वन्ति। सञ्जयस्य दिव्य दृष्टि तु वयं कदापि ज्ञातुं न शक्नुमः। समीपस्थः वस्तु अपि वयं द्रष्टुं असमर्था तर्हि दिव्या दृष्ट्या का उपयोगिता? अर्जुनः इव सञ्जयः धृतराष्ट्रश्च गीतां अश्रृण्वन्। किन्तु तर्योमध्ये किम् अन्तरायते? अस्मान् अपि किम् अन्तरायते?
वयं केवलं पठामः। यादृशी षड् दर्शनप्रकाराः महाभारते वर्णिता अस्ति।

**डॉ. वर्षा प्रकाश टोणगांवकर,पुणे / महाराष्ट्रम्**

# वार्ता-संवादः

**हिमसंस्कृतवार्ताः , ईदरधीरजः,हैदराबादः**

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य काः विचित्राः वार्ताः सन्ति?

**काव्या-** नमस्ते नन्दिनि। अद्य एका विचित्रा वार्ता मया श्रुता। न्यूयॉर्कनगरे अत्युन्नत- सौध- शिखरे एकेन युगलेन विवाह-प्रस्तावः कृतः। किन्तु तयोः पार्श्वे किमपि सुरक्षोपकरणं न धृतम्। शिखरात् अवतरण-समये आरक्षकैः तौ गृहीतौ। इदानीं तौ कारावासे स्थापितौ स्तः।

**नन्दिनी-** अहो, विस्मयकरः अयं विवाह-प्रस्तावः! कारावासे एव तयोः प्रथमरात्रौ वासः कृतः। इतः अपरा विचित्रा वार्ता। भोपालनगरे पत्युः घर्घररव- कारणतः एकया पत्न्या विवाहविच्छेदः याचितः। पञ्चवर्षेभ्यः पूर्वं तयोः विवाहः जातः। पतिः सज्जनः
अस्ति, किन्तु तस्य घर्घररवेण सा दुःखिता जाता। मध्ये तयोः त्रिमासपर्यन्तं पृथग्वासः कृतः। इदानीं तयोः मेलनम् अस्ति, विवाहविच्छेदः च निवारितः।

**काव्या-** आम्, घर्घररवेण विवाह-भङ्गस्य प्रयासः अति-हास्यास्पदः वर्तते। अधुना एकस्य पक्षिणः कथा मया कथ्यते। सर्बियादेशस्य एकः दुर्लभः श्येनः सीरियादेशे व्याधैः गृहीतः। सः दूरभाषमाध्यमेन (सन्देश-माध्यमेन) विक्रयार्थं स्थापितः। ततः लेबानन-देशे रक्षकैः सः रक्षितः। इदानीं सर्बिया-देशस्य सैन्य-विमानेन सः स्वदेशं प्रत्यावर्तितः अस्ति।

**नन्दिनी-** सत्यम्, श्येनस्य अयं प्रवासः विस्मयकरः एव। अत्र मानवैः पक्षिणः अपि साहाय्यं कृतम्। अन्तिमा वार्ता झारखण्ड-राज्यस्य अस्ति। तत्र मियाजाकीनामकस्य अमूल्याम्रफलस्य चौर्यं जातम्। अस्य आम्रफलस्य मूल्यं प्रति-किलोग्रामं लक्षद्वयरूप्यकाणि अस्ति। कृषकः एतादृशं वृक्षद्वयं रोपितवान् अस्ति। ततः चौरेण पञ्च आम्रफलानि चोरितानि। अनेन कृषकः अतीव दुःखितः जातः।

**काव्या-** अहो, आम्रफलानां कृते अपि चौर्यं कृतम्! एताः वार्ताः अतीव विचित्राः सन्ति।

**नन्दिनी-** आम् काव्ये। अद्यतनं वार्ताकार्यक्रमं समापयामः। श्वः पुनर्मेलिष्यामः। नमो नमः।